International Journal of Sanskrit Research 2017; 3(1): 42-44

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 42-44
© 2017 IJSR
www.anantaajournal.com
Received: 15-11-2016
Accepted: 18-12-2016

**राघवेन्द्रमिश्रः**
गवेषकः, स्ना. ज्योतिषविभागः, का. सिं.द.सं विश्वविद्यालयः, दरभंगा, बिहार, भारत

**Correspondence**
**राघवेन्द्रमिश्रः**
गवेषकः, स्ना. ज्योतिषविभागः, का. सिं.द.सं विश्वविद्यालयः, दरभंगा, बिहार, भारत

# विंशोत्तरीदशानयनं तद्वर्षप्रमाणञ्च

**राघवेन्द्रमिश्रः**

**प्रस्तावना**

ज्योतिषं प्रत्यक्षशास्त्रं विद्यते। तत्र फलानि ग्रहाधीनान्येव। तेषां ग्रहाणां फलं कदा केन प्रकारेण च भवतीति निर्णयः दशानुसारेणैव भवति। तथा च प्रारब्धफलमपि दशानुसारेणैव भवति। यथाहि–

दशानुसारेण फलं वदन्ति मुनीश्वरा जातशुभाशुभं यत्।
सारं समुद्धृत्य तथैव वक्ष्ये भेदं यथाविस्तरतो दशायाम्।।(1)

एवञ्च राजयोग–भावयोग–अरिष्टयोग–दृष्टियोग–कारक–मारक– प्रभृतयः फलानि सर्वाणि दशानुसारेणैव नियोज्यन्ते। यथोक्तम्–

यद् राजयोगजनितं त्वथ भावजातं
यद् दृष्टियोगजफलं गदितं पुराणैः।
सर्वं च तत्किल दशाफलगं भवेच्च
तेनाधुना फलमलं कथयामि सम्यक्।।(2)

अपि च–

यद्यद्द्रव्यं कथितमृषिभिर्यस्य यस्य ग्रहस्य
कर्माजीवोऽपि च तनुभृतां यश्च यश्चोदितोऽत्र।
यद्भावोत्थं यदपि ग्रहजं योगजं दृष्टिजं च
तत्तत्सर्वं ग्रहबलवशाद्योजनीयं दशायाम्।।(3)

महर्षिणा पराशरेण–विशोंत्तरी–अष्टोत्तरी–षोडशोत्तरी–द्वादशोत्तरी–
पञ्चोत्तरी–शतसमा–चतुरशीत्यब्दा–द्विसप्ततिसमा–षष्ट्यब्दा–षट्त्रिंशद्वत्सरा–
कालदशा–चक्रदशा–कालचक्रदशा–चरदशा–स्थिरदशा–केन्द्रदशा–कारकग्रहोत्थदशा–
ब्रह्मग्रहदशा–मण्डूकदशा–शूलदशा–योगार्धदशा–दृग्दशा–त्रिकोणदशा–राशिदशा–
पञ्चस्वरादशा–योगिनीदशा–पिण्डदशा–अंशजदशा–नैसर्गिकदशा–अष्टवर्गदशा–
सन्ध्यादशा–पाचकदशा–तारादशा–आदिकदशा–प्रभृतयः बह्व्यः दशाः कथिताः। परन्तु सर्वा न सम्मता। एतासु दशासु विंशोत्तरीदशायाः महत्वं प्राधान्येन सर्वत्र प्रतिपादितमस्ति। यतो हि मानवानां परमायुः ऋषिभिः विद्वद्भिश्च 120वर्षाणि प्रकल्पितानि सन्ति। अत्र विंशोत्तरीदशेत्यादि– विषयाणामुल्लेखः क्रियते। यथाहि–

विंशोत्तरीदशाज्ञानप्रकारमाह–

नयनो2नजनुर्भतोऽङ्क9हृत्क्रमशोऽर्केन्दुकुजागुसूरयः।(4)
शनिचन्द्रजकेतुभार्गवाः परिशेषास्तु दशाधिपाः स्मृताः।।(5)

जन्मनक्षत्रानुसारमेषा दशा भवति। तत्राश्विनीनक्षत्राद् जन्मनक्षत्रं यावत् या संख्या स्यात् तस्याम् नयनम् (नयने द्वे भवतः अर्थात् द्वौ) ऊनम्=ऋणं कृत्वा, अङ्क=नवभिः, हृत्=भाजितव्यम्। तेनैकादिशेषक्रमानुसारं–सूर्यः, चन्द्रः कुजः, राहुः, गुरुः, शनिः, बुधः, केतुः, शुक्रश्च विंशोत्तरीदशाधिपाः स्मृताः सन्ति।

तथैव ज्योतिषरत्नाकरेऽपि।[6]

> लघुपाराशर्य्यां प्रोक्तमस्ति–
> कृत्तिकातः समारभ्य त्रिरावृत्यः दशाधिपाः।[7]

अर्थात् कृत्तिकानक्षत्रात् प्रारभ्य त्रयावृत्तिषु सप्तविंशतिनक्षत्राणां गणना भवति। नक्षत्रवशात् गणनाक्रमेण दशास्वामिनः ग्रहाः भवन्ति। यथा हि–

> सूर्येन्दुकुजराह्वीज्यशनिज्ञशिखिभार्गवाः।[8]

अर्थात् क्रमेण सूर्य–चन्द्र–भौम–राहु–बृहस्पति–शनि–बुध–केतु–शुक्रग्रहाणां विंशोत्तरीदशा भवति। तद्यथा प्रथमस्थाने गणनया आगत–कृत्तिका उत्तरफल्गुनी–उत्तराषाढ–नक्षत्राणां विंशोत्तरीदशास्वामी सूर्यो भवति। तदनन्तरं द्वितीयस्थानस्थितनक्षत्राणां रोहिणी–हस्त–श्रवणनक्षत्राणां विंशोत्तरीदशास्वामी चन्द्रो भवति। एवमेव तृतीयस्थानादिष्वपि क्रमेण कुजादीनां विंशोत्तरीदशाज्ञेयाः।

### भावकुतूहलेऽप्युक्तम्

> कृत्तिकादिस्त्रिरावृत्त्या दशा विंशोत्तरी मता।
> अष्टोत्तरी न संग्राह्या मारकार्थं विचक्षणैः।।[9]

अर्थात् कृत्तिकादिनवनक्षत्राणां त्रिरावृत्तिकरणेन विंशोत्तरीदशाः भवन्ति। समस्तविचारहेतवे विंशोत्तरीदशाग्रहणनिर्देशः पूर्वाचार्यैः प्रदत्तः। अपि च अष्टोत्तरीदशा ग्राह्या नास्ति, तत्रापि विशेषेण मारकविचारार्थम्। पुनश्च तत्रैव–

> रवाविन्दावारे तमसि च गुरौ भानुतनये
> बुधे केतौ शुक्रे क्रमत उदिताः पाकशरदः।।[10]

अर्थात् कृतिकादिनव–नवनक्षत्राणां एकादिकक्रमेण रवि–इन्दु (चन्द्र)–आर (कुज)–तमस् (राहु)–गुरु–भानुतनय (शनि)–बुध–केतु–शुक्राणां विंशोत्तरीदशा भवति।
जन्मपत्रदीपकेऽपि कथितमस्ति–

> स्युः कृत्तिकादिनवकत्रिकभे रवीन्दु–
> भौमाऽगुजीवशनिविच्छिखिभार्गवाणाम्।[11]

अर्थात् कृत्तिकानक्षत्रादारभ्य नव–नवनक्षत्राणां त्रिरावृत्तिगणनया सूर्य–चन्द्र–कुज–राहु–गुरु–शनि–बुध– केतु– शुक्राणां क्रमेण विंशोत्तरीदशा भवति।
होराशास्त्रेऽपि एवमेवोक्तम्–

> कृत्तिकादेस्त्रिरावृत्त्या रवीन्दुकुजराहवः।
> जीवार्किविच्छिखिसिता दशेशाः परिकीर्तिताः।।
> जनुर्भमग्निभाद्यावद् विगणय्याङ्कतो भजेत्।
> शेषाङ्कतो दशानाथस्ततो भुक्तादिमानयेत्।।[12]

अर्थात् कृत्तिकानक्षत्रादारभ्य त्रिरावृत्या सूर्य–चन्द्र–भौम–राहु–गुरु–शनि–बुध–केतु–शुक्रा एते नवग्रहाः दशेशाः भवन्ति। दशाज्ञानाय कृत्तिकातः जन्मर्क्षं यावत् परिगण्य नवभिः भाज्यम्, शेषाङ्केन क्रमशः दशेशानां ज्ञानं कर्त्तव्यम्।

### जातकपारिजातेऽपि

**आदित्यचन्द्रकुजराहुसुरेशमन्त्रिमन्दज्ञकेतुभृगुजा नव कृत्तिकाद्याः।[13]**
अर्थात् कृत्तिकानक्षत्रात् प्रारभ्य नवानि नक्षत्राणि पूर्वफल्गुनीपर्यन्तं क्रमशः सूर्य–चन्द्र–मंगल–राहु–गुरु–शनि–बुध–केतु–शुक्राः स्वामिनः अर्थात् विंशोत्तरी– दशापतयः भवन्ति। एवमेव उत्तरफल्गुन्याः पूर्वाषाढयावत्, उत्तराषाढात् भरणीयावच्च सूर्यादिग्रहा उपर्युक्तक्रमेण विंशोत्तरीदशापतयः भवन्ति।
मानसागर्य्यामपि कथितमस्ति–

> दास्रादितो जन्मभसंख्यका या दृगूनिता साङ्गहृतावशेषात्।
> सू–चं–कु–रा–जी–श–बु–के–शु–पूर्वाः दशाधिपाः संकथिता मुनीन्द्रैः।।[14]

अर्थात् दास्रादितः=अश्विनी नक्षत्रतः, जन्मभ=जन्मनक्षत्रपर्यन्तम्, या संख्यका=संख्या स्यात्, तस्यां संख्यायाम्, दृगूनिता=द्वे शोधयित्वा, अवशेषात्= विशोधनानन्तरं य शेषः स्यात्, तस्मिन् शेषे, साङ्क=नवभिः, हृता=भाजनीया। नवभिः भाजनानन्तरम् एकादिशेषे क्रमेण सू=सूर्य, चं=चन्द्र, कु=कुज, रा=राहु, जी=गुरु, श=शनि, बु=बुध, के=केतु, शु=शुक्र एते दशाधिपाः=विंशोत्तरीदशापतयः, मुनीन्द्रैः= आचार्यैः, संकथिताः=उक्ताः।

### विंशोत्तरीदशावर्षप्रमाणम्

विंशोत्तरीदशावर्षे कस्य–कस्य ग्रहस्य कति–कति दशावर्षाणि भवन्तीति विषयविविच्यते–
दशावर्षाण्याह–

> रस6दिक्10 सप्त7नागेन्दु18भूपाङ्क16शशिन19स्तथा।
> सप्तेन्दु17मुनि7खाश्वाः20 स्यू रव्यादीनां दशासमाः।।[15]

अर्थात् विंशोत्तरीदशायां रव्यादिग्रहाणां यथाक्रमं व्यवस्थितं कृतम्, तथैव क्रमेण तेषां ग्रहाणां कति–कति दशावर्षाणि भवन्तीति विषयोऽत्रोल्लेखः। तद्यथा– रस=षड्वर्षाणि, दिक्=दशवर्षाणि, सप्त=सप्तवर्षाणि, नागेन्दु=अष्टादशवर्षाणि, भूपाङ्क=षोडशवर्षाणि, शशिनः=नवदशवर्षाणि, सप्तेन्दु=सप्तदशवर्षाणि, मुनि= सप्तवर्षाणि तथा खाश्वाः=विंशतिवर्षाणि, रव्यादीनाम्=सूर्यादीनां नवग्रहाणाम्, दशासमाः = दशावर्षाणि, स्युः=भवन्तीत्यर्थः।
लघुपाराशर्य्यामपि कथितमेवमेव[16]–
ग्रहाणां विंशोत्तरीदशावर्षाणि ''षड् दशाश्वाः गजेन्दवः नृपालाः नवचन्द्राश्च नगश्चन्द्रा नगाः नखाः क्रमेण'' षड्=6, दश=10, अश्वाः=7, गजेन्दवः=18, नृपालाः= 16, नवचन्द्राः=19, नगश्चन्द्राः=17, नगाः=7, नखाः=20वर्षाणि च भवन्ति।

### भावकुतूहलेऽपि

> रसा आशाः शैला वसुविधुमिता भूपतिमिता
> नवेलाः शैलेला नगपरिमिता विंशतिमिताः।
> रवाविन्दावारे तमसि च गुरौ भानुतनये
> बुधे केतौ शुक्रे क्रमत उदिताः पाकशरदः।।[17]

अर्थात् रवौ रसाः(6), इन्दौ आशाः(10), आरे शैलाः(7), तमसि वसुविधुमिताः(18) च गुरौ भूपतिमिताः(16), भानुतनये नवेलाः(19), बुधे शैलेलाः(17), केतौ नगपरिमिताः(7), शुक्रे विंशतिमिताः(20) एवं क्रमतः पाकशरद उदिताः।

### होराशास्त्रे

> दशाब्दास्तत्र रसदिक्सप्ताष्टेन्दुनृपास्तथा।
> अङ्केन्दवोऽश्वचन्द्राश्च गिरयो विंशतिः क्रमात्।।
> विंशोत्तर्यां पूर्णमायुर्विंशोत्तरशतं स्मृतम्।।[18]

अर्थात् विंशोत्तरीदशानुसारं पूर्णायुः विंशत्यधिकमेकशतं भवति। तत्र ग्रहाणां दशाब्दा एवं क्रमेण सन्ति। यथा–सूर्यस्य रस(6), चन्द्रस्य दिक्(10), कुजस्य सप्त(7), राहोः अष्टेन्दु(18), गुरोः नृपाः(16), शनेः

अङ्केन्दवः(19), बुधस्य अश्वचन्द्राः(17), केतोः गिरयः(7) शुक्रस्य च विंशति(20)रिति।

**मानसागरीपद्धतौ**

षड् दश सप्ताष्टादश षोडश नन्देन्दवो मुनिशशाङ्काः।
सप्त नखा वर्षाणि हि रव्यादीनां यथाक्रमतः।।[19]

अर्थात् रव्यादीनाम्=सूर्यादिग्रहाणाम्, यथाक्रमतः=यथाक्रमानुसारम्, सूर्यस्य =षड्, चन्द्रमसः=दश, भौमस्य=सप्त, राहोः=अष्टादश, बृहस्पतेः=षोडश, शनेः= एकोनविंशतिः, बुधस्य=सप्तदश, केतोः=सप्त, शुक्रस्य च=विंशतिः दशावर्षाणि सन्ति।

**जन्मपत्रदीपके**

षड्दिङ्नगेभविधु–भूप–नवेन्दु–शैल–
भू–भूधरा नखमिताः क्रमतो दशाब्दाः।।[20]

अर्थात् रव्यादीनां विंशोत्तरीदशा क्रमशः षड्(6), दिङ्(10), नग(7), इभ विधु(18), भूप(16), नवेन्दु(19), शैलभू (17), भूधरा(7), नखमिताः(20) वर्षाणि भवन्ति।

**जातकपारिजाते–**

तेनो नयः सिनदयातटधन्यसेव्यसेनानरा दिनकरादिदशाब्दसंख्याः।।[21]

तेनः=6, नयः10, सिन=7, दया=18, तट=16, धन्य=19, सेव्य=17, सेना=7, नराः=20 वर्षाणि क्रमशः उपर्युक्तसूर्यादिग्रहाणां दशावर्षाणि स्युः।

एवं वक्तुमिदं शक्यते यत् लघुजन्मपद्धति–ज्योतिषरत्नाकर –लघुपाराशरी–भावकुतूहल–जन्मपत्रदीपक–होराशास्त्र– जातकपारिजात– मानसागरीपद्धति–प्रभृतिग्रन्थेषु विंशोत्तरीदशानयनं तद्वर्षप्रमाणञ्च समाना एव निरूपितास्सन्ति। तत्र विदुषां मतैक्यं दृश्यते। विस्तृतविवेचनं त्वत्र शोधपत्रे नैव सम्भवतीति शम्।

**संदर्भाः**


1. जातकपारिजात–दशाफलाध्याय–श्लोक–1।
2. दशाफलदर्पण–दशाप्रयोजनाध्याय–श्लो०–9।
3. तत्रैव, श्लो०–10।
4. नयनाभ्यां द्वाभ्यामूनं यज्जनुर्भं जन्मनक्षत्रं तस्मादित्यर्थः।
5. लघुजन्मपद्धति–श्लोक–14।
6. ज्योतिषरत्नाकर–प्रथमभाग–गणितप्रवाह–अध्याय–9, पृष्ठ–125।
7. लघुपाराशरी–पृष्ठ–8।
8. लघुपाराशरी–पृष्ठ–9।
9. भावकुतूहल–अ०–16, श्लोक–2।
10. भावकुतूहल–अ०–16, श्लोक–1।
11. जन्मपत्रदीपक–श्लोक–52।
12. बृहत्पाराशरहोराशास्त्र–अध्याय–47, श्लोक–11–12।
13. जातकपारिजात–अध्याय–18, श्लोक–3।
14. मानसागरीपद्धति–अध्याय–5, श्लोक–7 (विशेष)।
15. लघुजन्मपद्धति–श्लोक–15।
16. लघुपाराशरी–पृ०–9।
17. भावकुतूहल–अध्याय–16, श्लोक–1।
18. बृहत्पाराशरहोराशास्त्र–अध्याय–47, श्लोक–13।
19. सटीकमानसागरीपद्धति–अध्याय–5, श्लोक–7 (विशेष)।
20. जन्मपत्रदीपक–श्लो०–52।
21. जातकपारिजात–दशाफलाध्याय–श्लो०–3।